# shrIrAmasahasranAmAvaliH 3

# श्रीरामसहस्रनामावलिः ३

## Document Information

Text title : rAmasahasranAmAvaliH 3

File name : rAmasahasranAmAvaliH3.itx

Category : raama, sahasranAmAvalI, nAmAvalI

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 2, 2020

*sanskritdocuments.org*

# श्रीरामसहस्रनामावलिः ३

(अकारादिज्ञकारान्त)

॥ श्रीः ॥

सङ्कल्पः -

यजमानः, आचम्य, प्राणानायम्य, हस्ते जलाऽक्षतपुष्पद्रव्याण्यादाय, अद्येत्यादि-मास-पक्षाद्युच्चार्य एवं सङ्कल्पं कुर्यात् । शुभपुण्यतिथौ अमुकप्रवरस्य अमुकगोत्रस्य अमुकनाम्नो मम यजमानस्य सकुटुम्बस्य श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं त्रिविधतापोपशमनार्थं सकलमनोरथसिद्ध्यर्थं श्रीसीतारामचन्द्रप्रीत्यर्थं च श्रीरामसहस्रनामावलिः पाठं करिष्ये । अथवा कौशल्यानन्दवर्द्धनस्य श्रीभरतलक्ष्मणाग्रजस्य स्वमताभीष्टसिद्धिदस्य श्रीसीतासहितस्य मर्यादापुरुषोत्तमश्रीरामचन्द्रस्य सहस्रनामभिः श्रीरामनामाङ्कित-तुलसीदलसमर्पणसहितं पूजनमहं करिष्ये । अथवा सहस्रनमस्कारान् करिष्ये ॥

विनियोगः -

ॐ अस्य श्रीरामचन्द्रसहस्रनामस्तोत्रमन्त्रस्य भगवान् शिव ऋषिः, अनुष्टुप् छन्दः, श्रीरामसीतालक्ष्मणा देवताः, चतुर्वर्गफलप्राप्त्ययर्थं पाठे (तुलसीदलसमर्पणे, पूजायां नमस्कारेषु वा) विनियोगः ॥

करन्यासः -

श्रीरामचन्द्राय, अङ्गुष्ठाभ्यां नमः ।

श्रीसीतापतये, तर्जनीभ्यां नमः ।

श्रीरघुनाथाय, मध्यमाभ्यां नमः ।

श्रीभरताग्रजाय, अनामिकाभ्यां नमः ।

श्रीदशरथात्मजाय, कनिष्ठिकाभ्यां नमः ।
श्रीहनुमत्प्रभवे, करतलकरपृष्ठाभ्यां नमः ॥

अङ्गन्यासः -
श्रीरामचन्द्राय, हृदयाय नमः ।
श्रीसीतापतये, शिरसे स्वाहा ।
श्रीरघुनाथाय शिखायै वषट् ।
श्रीभरताग्रजाय कवचाय हुम् ।
श्रीदशरथात्मजाय नेत्रत्रयाय वौषट् ।
श्रीहनुमत्प्रभवे, अस्त्राय फट् ॥

ध्यानम् -
ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डनं रामचन्द्रम् ॥ १॥ var मण्डलं
नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ २॥

मानस-पञ्चोपचार-पूजनम्-
१ ॐ लं पृथिव्यात्मने गन्धं परिकल्पयामि ।
२ ॐ हं आकाशात्मने पुष्पं परिकल्पयामि ।
३ ॐ यं वाय्वात्मने धूपं परिकल्पयामि ।
४ ॐ रं वह्न्यात्मने दीपं परिकल्पयामि ।
५ ॐ वं अमृतात्मने नैवेद्यं परिकल्पयामि ।

ॐ अनादये नमः । अधिवासाय । अच्युताय । आधाराय ।
आत्मप्रचालकाय । आदये । आत्मभुजे । इच्छाचारिणे ।
इभबन्धारिणे । इडानाडीश्वराय । इन्द्रियेशाय । ईश्वराय ।
ईतिविनाशकाय । उमाप्रियाय । उदारज्ञाय । उमोत्साहाय ।
उत्साहाय । उत्कटाय । उद्यमप्रियाय । ऊनसत्त्वबलप्रदाय नमः ॥ २०

ॐ ऊधाब्धिदानकर्त्रे नमः । ऋणदुःखविमोचकाय ।
ऋणमुक्तिकराय । एकपत्नये । एकबाणधृषे । ऐद्रजालिकाय ।
ऐश्वर्यभोक्त्रे । ऐश्वर्याय । ओषधिरसप्रदाय । ओण्ड्रपुष्पाभिलाषिणे ।

औत्तानपादिसुखप्रियाय । औदार्यगुणसम्पन्नाय । औदराय ।
औषधाय । अंसिने । अङ्कूरकाय । काकुत्स्थाय । कमलानाथाय ।
कोदण्डिने । कामनाशनाय नमः ॥ ४०

ॐ कार्मुकिने । काननस्थाय । कौसल्यानन्दवर्धनाय ।
कोदण्डभञ्जनाय । काकध्वंसिने । कार्मुकभञ्जनाय । कामारिपूजकाय ।
कर्त्रे । कर्बूरकुलनाशनाय । कबन्धारये । क्रतुत्रात्रे । कौशिकाह्लाद-
कारकाय । काकपक्षधराय । कृष्णाय । कृष्णोत्पलदलप्रभाय ।
कञ्जनेत्राय । कृपामूर्तये । कुम्भकर्णविदारणाय । कपिमित्राय ।
कपित्रात्रे नमः ॥ ६०

ॐ कपिकालाय नमः । कपीश्वराय । कृतसत्याय ।
कलाभोगिने । कलानाथमुखच्छवये । काननिने । कामिनीसङ्गिने ।
कुशताताय । कुशासनाय । कैकेयीयशःसंहर्त्रे । कृपासिन्धवे ।
कृपामयाय । कुमाराय । कुकुरत्रात्रे । करुणामयविग्रहाय ।
कारुण्याय । कुमदानन्दाय । कौसल्यागर्भसेवनाय ।
कन्दर्पनिन्दिताङ्गाय । कोटिचद्रनिभाननाय नमः ॥ ८०

ॐ कमलापूजिताय नमः । कामाय । कमलापरिसेविताय ।
कौसल्येयाय । कृपाधात्रे । कल्पद्रुमनिषेविताय । खड्गहस्ताय ।
खरध्वंसिने । खरसैन्यविदारणाय । खरपुत्रप्राणहर्त्रे ।
खण्डितासुरजीवनाय । खलान्तकाय । खस्थवराय । रवण्डितेशधनुषे ।
खेदिने । खेदहराय । खेददायकाय । खेदवारणाय । खेदघ्ने ।
खरघ्ने नमः ॥ १००

ॐ खड्गिने क्षिप्रप्रसाददायकाय नमः ।
खेलत्खञ्जननेत्राय । खेलत्सरसिजाननाय ।
खगचञ्चुसुनासाय । खञ्जनेशसुलोचनाय । खञ्जरीटपतये ।
खञ्जरीटविचञ्चलाय । गुणाकराय । गुणानन्दाय ।
गञ्जितेशधनुषे । गुणसिन्धवे । गयावासिने । गयाक्षेत्रप्रकाशकाय ।
गुहमित्राय । गुहत्रात्रे । गुहपूज्याय । गुहेश्वराय ।
गुरुगौरवकर्त्रे । गुरुगौरवरक्षकाय । गुणिने नमः ॥ १२०

ॐ गुणप्रियाय नमः । गीताय । गर्गाश्रमनिषेवकाय ।
गवेशाय । गवयत्रात्रे । गवाक्षामोददायकाय । गन्धमादनपूज्याय ।

गन्धमादनसेविताय । गौरभार्याय । गुरुत्रात्रे । गुरुयज्ञाधिपालकाय ।
गोदावरीतीरवासिने । गङ्गास्नायिने । गणाधिपाय । गरुत्मद्रथिने ।
गुर्विणे । गुणात्मने । गुणेश्वराय । गरुडिने । गण्डकीवासिने नमः ॥ १४०

ॐ गण्डकीतीरचारणाय नमः । गभर्वासनियन्त्रे । गुरुसेवा-
परायणाय । गीष्पतिस्तूयमानाय । गीर्वाणत्राणकारकाय । गौरीश-
पूजकाय । गौरीहृदयानन्दवर्धनाय । गीतप्रियाय । गीतरताय ।
गीर्वाणवन्दिताय । घनश्यामाय । घनानन्दाय । घोरराक्षसघातकाय ।
घनविघ्नविनाशाय । घननादविनाशकाय । घनानन्दाय । घनानादिने ।
घनगर्जिनिवारणाय । घोरकाननवासिने । घोरशस्त्रविनाशकाय नमः ॥ १६०

ॐ घोरबाणधराय । घोराय । घोरधन्वने । घोरपराक्रमाय ।
घर्मबिन्दुमुखश्रीमते । घर्मबिन्दुविभूषिताय । घोरमारीचहन्त्रे ।
घोरवीरविघातकाय । चन्द्रवक्त्राय । चञ्चलाक्षाय । चन्द्रमूर्तये ।
चतुष्कलाय । चन्द्रकान्तये । चकोराक्षाय । चकोरीनयनप्रियाय ।
चण्डबाणाय । चण्डधन्वने । चकोरीप्रियदर्शनाय । चतुराय ।
चातुरीयुक्ताय नमः ॥ १८०

ॐ चातुरीचित्तचारकाय नमः । चलत्खड्गाय ।
चलद्बाणाय । चतुरङ्गबलान्विताय । चारुनेत्राय । चारुवक्त्राय ।
चारुहासाय । चारुप्रियाय । चिन्तामणिविभूषाङ्गाय । चिन्तामणि-
मनोरथिने । चिन्तामणिमणिप्रियाय । चित्तहर्त्रे । चित्तरूपिणे ।
चलच्चित्ताय । चिताञ्चिताय । चराचरभयत्रात्रे ।
चराचरमनोहराय । चतुर्वेदमयाय । चिन्त्याय ।
चिन्तादूराय नमः ॥ २००

ॐ चिन्तासागरवारणाय नमः । चण्डकोदण्डधारिणे ।
चण्डकोदडखण्डनाय । चण्डप्रतापयुक्ताय । चण्डेषवे । चण्डविक्रमाय ।
चतुर्विक्रमयुक्ताय । चतुरङ्गबलापहाय । चतुराननपूज्याय ।
चतुःसागरशासित्रे । चमूनाथाय । चमूभर्त्रे । चमूपूज्याय ।
चमूयुताय । चमूहर्त्रे । चमूभञ्जिने । चमूतेजोविनाशकाय ।
चामरिणे । चारुचरणाय । चरणारुणशोभनाय नमः ॥ २२०

ॐ चर्मिणे नमः । चर्मप्रियाय । चारुमृगचर्मविभूषिताय ।
चिद्रूपिणे । चिदानन्दाय । चित्स्वरूपिणे । चराचराय । छन्नरूपिणे ।

छत्रसङ्गिने । छात्रगणविभूषिताय । छात्राय । छत्रप्रियाय । छत्रिणे ।
छत्रमोहार्तपालकाय । छत्रचामरयुक्ताय । छत्रचामरमण्डिताय ।
छत्रचामरहर्त्रे । छत्रचामरदायकाय । छत्रधारिणे ।
छत्रहर्त्रे नमः ॥ २४०

ॐ छत्रत्यागिने नमः । छत्रदाय । छत्ररूपिणे । छलत्यागिने ।
छलात्मने । छलविग्रहाय । छिद्रहर्त्रे । छिद्ररूपिणे ।
छिद्रौघविनिषूदनाय । छिन्नशत्रवे । छिन्नरोगाय । छिन्नधन्वने ।
छलापहाय । छिन्नच्छत्रप्रदाय । छेदकारिणे । छलापघ्ने ।
जनकीशाय । जितामित्राय । जानकीहृदयप्रियाय ।
जानकीपालकाय नमः ॥ २६०

ॐ जेत्रे नमः । जितशत्रवे । जितासुराय । जानक्युद्धारकाय ।
जिष्णवे । जितसिन्धवे । जयप्रदाय । जानकीजीवनानन्दाय ।
जानकीप्राणवल्लभाय । जानकीप्राणभर्त्रे । जानकीदृष्टिमोहनाय ।
जानकीचित्तहर्त्रे । जानकीदुःखभञ्जनाय । जयदाय । जयकर्त्रे ।
जगदीशाय । जनार्दनाय । जनप्रियाय । जनानन्दाय ।
जनपालाय नमः ॥ २८०

ॐ जनोत्सुकाय नमः । जितेन्द्रियाय । जितक्रोधाय ।
जीवेशाय । जीवनप्रियाय । जटायुमोक्षदाय । जीवत्रात्रे ।
जीवनदायकाय । जयन्तारये । जानकीशाय । जनकोत्सवदायकाय ।
जगत्त्रात्रे । जगत्पात्रे । जगत्कर्त्रे । जगत्पतये । जाड्यघ्ने ।
जाड्यहर्त्रे । जाड्येन्धनहुताशनाय । जगन्मूर्तये । जगत्कर्त्रे नमः ॥ ३००

ॐ जगतां पापनाशनाय नमः । जगच्चिन्त्याय । जगद्वन्द्याय ।
जगज्जेत्रे । जगत्प्रभवे । जनकारिविहर्त्रे । जगज्जाड्यविनाशकाय ।
जटिने । जटिलरूपाय । जटाधारिणे । जटावहाय । झर्झरप्रियवाद्याय ।
झञ्झावातनिवारकाय । झञ्झारवस्वनाय । झान्ताय । झार्णाय ।
झार्णविभूषिताय । टङ्कारये । टङ्कदात्रे ।
टीकादृष्टिस्वरूपधृषे नमः ॥ ३२०

ॐ ठकारवर्णनियमाय नमः । डमरुध्वनिकारकाय ।
ढक्कावाद्यप्रियाय । ढार्णाय । ढक्कावाद्यमहोत्सुकाय । तीर्थसेविने ।
तीर्थवासिने । तरवे । तीर्थतीरनिवासकाय । तालभेत्त्रे ।

तालघातिने । तपोनिष्ठाय । तपःप्रभवे । तापसाश्रमसेविने ।
तपोधनसमाश्रयाय । तपोवनस्थिताय । तपसे । तापसपूजिताय ।
तन्वीभार्याय । तनूकर्त्रे नमः ॥ ३४०

ॐ त्रैलोक्यवशकारकाय नमः । त्रिलोकीशाय । त्रिगुणकाय ।
त्रिगुण्याय । त्रिदिवेश्वराय । त्रिदिवेशाय । त्रिसर्गेशाय । त्रिमूर्तये ।
त्रिगुणात्मकाय । तन्त्ररूपाय । तन्त्रविज्ञाय । तन्त्रविज्ञानदायकाय ।
तारेशवदनोद्योतिने । तारेशमुखमडलाय । त्रिविक्रमाय ।
त्रिपादूर्ध्वाय । त्रिस्वराय । त्रिप्रवाहकाय । त्रिपुरारिकृतभक्तये ।
त्रिपुरारिप्रपूजिताय नमः ॥ ३६०

ॐ त्रिपुरेशाय नमः । त्रिसर्गाय । त्रिविधाय । त्रितनवे ।
तूणिने । तूणीरयुक्ताय । तूणबाणधराय । ताटकावधकर्त्रे ।
ताटकाप्राणघातकाय । ताटकाभयकर्त्रे । ताटकादर्पनाशकाय ।
थकारवर्णनियमाय । थकारप्रियदर्शनाय । दीनबन्धवे । दयासिन्धवे ।
दारिद्र्यापद्विनाशकाय । दयामयाय । दयामूर्तये । दयासागराय ।
दिव्यमूर्तये नमः ॥ ३८०

ॐ दीर्घबाहवे नमः । दीर्घनेत्राय । दुरासदाय । दुराधर्षाय ।
दुराराध्याय । दुर्मदाय । दुर्गनाशनाय । दैत्यारये । दनुजेन्द्रारये ।
दानवेंद्रविनाशनाय । दूर्वादलश्याममूर्तये । दूर्वादलघनच्छवये ।
दूरदर्शिने । दीर्घदर्शिने । दुष्टारिबलहारकाय ।
दशग्रीववधाकाङ्क्षिणे । दशकन्धरनाशकाय ।
दूर्वादलश्यामकान्तये । दूर्वादलसमप्रभाय । दात्रे नमः ॥ ४००

ॐ दानपराय नमः । दिव्याय । दिव्यसिंहासनस्थिताय ।
दिव्यदोलासमासीनाय । दिव्यचामरमण्डिताय । दिव्यच्छत्र-
समायुक्ताय । दिव्यालङ्कारमण्डिताय । दिव्याङ्गनाप्रमोदाय ।
दिलीपान्वयसम्भवाय । दूषणारये । दिव्यरूपिणे । देवाय ।
दशरथात्मजाय । दिव्यदाय । दधिभुजे । दात्रे । दुःखसागरभञ्जनाय ।
दण्डिने । दण्डधराय । दान्ताय नमः ॥ ४२०

ॐ दन्तुराय नमः । दनुजापहाय । धैर्याय । धीराय ।
धरानाथाय । धनेशाय । धरणीपतये । धन्विने । धनुष्मते ।
धे(धा)नुष्काय । धनुर्भङ्क्त्रे । धनाधिपाय । धार्मिकाय । धर्मशीलाय ।

धर्मिष्ठाय । धर्मपालकाय । धर्मपात्रे । धर्मयुक्ताय ।
धर्मनिन्दकवर्जकाय । धर्मात्मने नमः ॥ ४४०

ॐ धरणीत्यागिने । धर्मयूपाय । धनार्थदाय । धर्मारण्यकृतावासाय ।
धर्मारण्यनिषेवकाय । धरोद्धर्त्रे । धरावासिने । धैर्यवते ।
धरणीधराय । नारायणाय । नराय । नेत्रे । नन्दिकेश्वरपूजिताय ।
नायकाय । नृपतये । नेत्रे । नेयाय । नटाय । नरपतये ।
नरेशाय नमः ॥ ४६०

ॐ नगरत्यागिने नमः । नन्दिग्रामकृताश्रयाय । नवीनेन्दुकलाकान्तये ।
नौपतये । नृपतेःपतये । नीलेशाय । नीलसन्तापिने । नीलदेहाय ।
नलेश्वराय । नीलाङ्गाय । नीलमेघाभाय । नीलाञ्जनसमद्युतये ।
नीलोत्पलदलप्रख्याय । नीलोत्पलदलेक्षणाय ।
नवीनकेतकीकुन्दाय । नूत्नमालावृन्दविराजिताय । नारीशाय ।
नागरीप्राणाय । नीलबाहवे । नदिने नमः ॥ ४८०

ॐ नदाय नमः । निद्रात्यागिने । निद्रिताय । निद्रालवे ।
नदबन्धकाय । नादाय । नादस्वरूपाय । नादात्मने । नादमण्डिताय ।
पूर्णानन्दाय । परब्रह्मणे । परस्मै तेजसे । परात्पराय । परस्मै धाम्ने ।
परस्मै मूर्तये । परहंसाय । परावराय । पूर्णाय । पूर्णोदराय ।
पूर्वाय नमः ॥ ५००

ॐ पूर्णारिविनिषूदनाय नमः । प्रकाशाय । प्रकटाय । प्राप्याय ।
पद्मनेत्राय । परात्पराय । पूर्णब्रह्मणे । पूर्णमूर्तये । पूर्णतेजसे ।
परस्मै वपुषे । पद्मबाहवे । पद्मवक्त्राय । पञ्चाननप्रपूजिताय ।
प्रपञ्चाय । पञ्चपूताय । पचाम्नायाय । परप्रभवे ।
पराय । पद्मेशाय । पद्मकोशाय नमः ॥ ५२०

ॐ पद्माक्षाय नमः । पद्मलोचनाय । पद्मापतये । पुराणाय ।
पुराणपुरुषाय । प्रभवे । पयोधिशयनाय । पालाय । पालकाय ।
पृथिवीपतये । पवनात्मजवन्द्याय । पवनात्मजसेविताय । पञ्चप्राणाय ।
पञ्चवायवे । पञ्चाङ्गाय । पञ्चसायकाय । पञ्चबाणाय ।
पूरकाय । प्रपञ्चनाशकाय । प्रियाय नमः ॥ ५४०

ॐ पातालाय नमः । प्रमथाय । प्रौढाय । पाशिने । प्रार्थ्याय ।
प्रियंवदाय । प्रियङ्कराय । पण्डितात्मने । पापघ्ने । पापनाशनाय ।

पाण्ड्येशाय । पूर्णशीलाय । पद्मिने । पद्मसमर्चिताय । फणीशाय ।
फणिशायिने । फणिपूज्याय । फणान्विताय । फलमूलप्रभोक्त्रे ।
फलदात्रे नमः ॥ ५६०

ॐ फलेश्वराय नमः । फणिरूपाय । फणिभर्त्रे । फणिभुग्वाहनाय ।
फल्गुतीर्थसदास्नायिने । फल्गुतीर्थप्रकाशकाय । फलाशिने ।
फलदाय । फुल्लाय । फलकाय । फलभक्षकाय । बुधाय ।
बौद्धप्रियाय । बुद्धाय । बुद्धाचारनिवारकाय । बहुदाय । बलदाय ।
ब्रह्मणे । ब्रह्मण्याय । ब्रह्मदायकाय नमः ॥ ५८०

ॐ भरतेशाय नमः । भारतीशाय । भरद्वाजप्रपूजिताय ।
भर्त्रे । भगवते । भोक्त्रे । भीतिघ्ने । भयनाशनाय । भवाय ।
भीतिहराय । भव्याय । भूपतये । भूपवन्दिताय । भूपालाय ।
भवनाय । भोगिने । भावनाय । भुवनप्रियाय । भारताराय ।
भारहर्त्रे नमः ॥ ६००

ॐ भारभृते नमः । भरताग्रजाय । भूभुजे । भुवनभर्त्रे ।
भूनाथाय । भूतिसुन्दराय । भेद्याय । भेदकराय । भेत्रे ।
भूतासुरविनाशनाय । भूमिदाय । भूमिहर्त्रे । भूमिदात्रे । भूमिपाय ।
भूतेशाय । भूतनाशाय । भूतेशपरिपूजिताय । भूधराय ।
भूधराधीशाय । भूधरात्मने नमः ॥ ६२०

ॐ भयापहाय नमः । भयदाय । भयदात्रे । भवहर्त्रे । भयावहाय ।
भक्षाय । भक्ष्याय । भवानन्दाय । भवमूर्तये । भवोदयाय ।
भवाब्धये । भारतीनाथाय । भरताय । भूमये । भूधराय ।
मारीचारये । मरुत्त्रात्रे । माधवाय । मधुसूदनाय ।
मन्दोदरीस्तूयमानाय नमः ॥ ६४०

ॐ मधुगद्गदभाषणाय नमः । मन्दाय । मन्दरारये । मन्त्रिणे ।
मङ्गलाय । मतिदायकाय । मायिने । मारीचहन्त्रे । मदनाय ।
मातृपालकाय । महामायाय । महाकायाय । महातेजसे ।
महाबलाय । महाबुद्धये । महाशक्तये । महादर्पाय । महायशसे ।
महात्मने । माननीयाय नमः ॥ ६६०

ॐ मूर्ताय नमः । मरकतच्छवये । मुरारये । मकराक्षारये ।
मत्तमातङ्गविक्रमाय । मधुकैटभहन्त्रे । मातङ्गवनसेविताय ।

मदनारिप्रभवे । मत्ताय । मार्तण्डवंशभूषणाय । मदाय । मदविनाशिने ।
मर्दनाय । मुनिपूजकाय । मुक्तिदाय । मरकताभाय । महिम्ने ।
मननाश्रयाय । मर्मज्ञाय । मर्मघातिने नमः ॥ ६८०

ॐ मन्दारकुसुमप्रियाय नमः । मन्दरस्थाय । मुहूर्तात्मने ।
मङ्गलाय । मङ्गलालकाय । मिहिराय । मण्डलेशाय । मन्यवे । मन्याय ।
महोदधये । मारुताय । मारुतेयाय । मारुतीशाय । मरुते । यशस्याय ।
यशोराशये । यादवाय । यदुनन्दनाय । यशोदाहृदयानन्दाय ।
यशोदात्रे नमः ॥ ७००

ॐ यशोहराय नमः । युद्धतेजसे । युद्धकर्त्रे । योधाय ।
युद्धस्वरूपकाय । योगाय । योगीश्वराय । योगिने । योगेन्द्राय ।
योगपावनाय । योगात्मने । योगकर्त्रे । योगभृते । योगदायकाय ।
योधाय । योधगणासङ्गिने । योगकृते । योगभूषणाय । यूने ।
युवतीभर्त्रे नमः ॥ ७२०

ॐ युवभ्रात्रे नमः । युवाजकाय । रामभद्राय । रामचन्द्राय ।
राघवाय । रघुनन्दनाय । रामाय । रावणहन्त्रे । रावणारये । रमापतये ।
रजनीचरहन्त्रे । राक्षसीप्राणहारकाय । रक्ताक्षाय । रक्तपद्माक्षाय ।
रमणाय । राक्षसान्तकाय । राघवेन्द्राय । रमाभर्त्रे । रमेशाय ।
रक्तलोचनाय नमः ॥ ७४०

ॐ रणरामाय नमः । रणासक्ताय । रणाय । रक्ताय ।
रणात्मकाय । रङ्गस्थाय । रङ्गभूमिस्थाय । रङ्गशायिने । रणार्गलाय ।
रेवास्नायिने । रमानाथाय । रणदर्पविनाशनाय । राजराजेश्वराय ।
राज्ञे । राजमण्डलमण्डिताय । राज्यदाय । राज्यहर्त्रे । रमणीप्राण-
वल्लभाय । राज्यत्यागिने । राज्यभोगिने नमः ॥ ७६०

ॐ रसिकाय नमः । रघूद्वहाय । राजेन्द्राय । रघुनाथाय ।
रक्षोघ्ने । रावणान्तकाय । लक्ष्मीकान्ताय । लक्ष्मीनाथाय । लक्ष्मीशाय ।
लक्ष्मणाग्रजाय । लक्ष्मणत्राणकर्त्रे । लक्ष्मणप्रतिपालकाय ।
लीलावताराय । लङ्कारये । केशाय । लक्ष्मणेश्वराय । लक्ष्मण-
प्राणदाय । लक्ष्मणप्रतिपालकाय । लङ्केशघातकाय । लङ्केशप्राण-
हारकाय नमः ॥ ७८०

ॐ लङ्कानाथवीर्यहर्त्रे नमः । लाक्षारसविलोचनाय । लवङ्ग-

कुसुमासक्ताय । लवङ्गकुसुमप्रियाय । ललनापालनाय । लक्षाय ।
लिङ्गरूपिणे । लसत्तनवे । लावण्यरामाय । लावण्याय । लक्ष्मी-
नारायणात्मकाय । लवणाम्बुधिबन्धाय । लवणाम्बुधिसेतुकृते । लीला-
मयाय । लवणजिते । लीलाय । लवणजित्प्रियाय । वसुधापालकाय ।
विष्णवे । विदुषे नमः ॥ ८००

ॐ विद्वज्जनप्रियाय नमः । वसुधेशाय । वासुकीशाय ।
वरिष्ठाय । वरवाहनाय । वेदाय । विशिष्टाय । वक्रे । वदान्याय ।
वरदाय । विभवे । विधये । विधात्रे । वासिष्ठाय । वसिष्ठाय ।
वसुपालकाय । वसवे । वसुमतीभर्त्रे । वसुमते । वसुदायकाय नमः ॥ ८२०

ॐ वार्ताधारिणे नमः । वनस्थाय । वनवासिने । वनाश्रयाय
विश्वभर्त्रे । विश्वपात्रे । विश्वनाथाय । विभावसवे । विभवे ।
विभज्यमानाय । विभक्ताय । वधबन्धनाय । विविक्ताय । वरदाय ।
वन्द्याय । विरक्ताय । वीरदर्पघ्ने । वीराय । वीरगुरवे ।
वीरदर्पध्वंसिने नमः ॥ ८४०

ॐ विशाम्पतये नमः । वानरारये । वानरात्मने । वीराय ।
वानरपालकाय । वाहनाय । वाहनस्थाय । वनाशिने ।
विश्वकारकाय । वरेण्याय । वरदात्रे । वरदाय । वरवञ्चकाय ।
वसुदाय । वासुदेवाय । वसवे । वन्दनाय । विद्याधराय ।
विद्याविन्ध्याय । विन्ध्याचलाशनाय नमः ॥ ८६०

ॐ विद्याप्रियाय नमः । विशिष्टात्मने । वाद्यभाण्डप्रियाय ।
वन्द्याय । वसुदेवाय । वसुप्रियाय । वसुप्रदाय । श्रीदाय । श्रीशाय ।
श्रीनिवासाय । श्रीपतये । शरणाश्रयाय । श्रीधराय । श्रीकराय ।
श्रीलाय । शरण्याय । शरणात्मकाय । शिवार्चिताय । शिवप्राणाय ।
शिवदाय नमः ॥ ८८०

ॐ शिवपूजकाय नमः । शिवकर्त्रे । शिवहर्त्रे । शिवात्मने ।
शिववाञ्छकाय । शायकिने । शङ्करात्मने । शङ्करार्चनतत्पराय ।
शङ्करेशाय । शिशवे । शौरये । शाब्दिकाय । शब्दरूपकाय । शब्द-
भेदिने । शब्दहर्त्रे । शायकाय । शरणार्तिघ्ने । शर्वाय ।
शर्वप्रभवे । शूलिने नमः ॥ ९००

ॐ शूलपाणिप्रपूजिताय नमः । शार्ङ्गिणे । शङ्करात्मने । शिवाय ।

शकटभञ्जनाय । शान्ताय । शान्तये । शान्तिदात्रे । शान्तिकृते ।
शान्तिकारकाय । शान्तिकाय । शङ्खधारिणे । शङ्खिने ।
शङ्खध्वनिप्रियाय । षड्चक्रभेदनकराय । षड्गुणाय ।
षडूर्मिकाय । षडिन्द्रियाय । षडङ्गाय । षोडशाय नमः ॥ ९२०

ॐ षोडशात्मकाय नमः । स्फुरत्कुण्डलहाराढ्याय । स्फुरन्मरकतच्छवये ।
सदानन्दाय । सतीभर्त्रे । सर्वेशाय । सज्जनप्रियाय । सर्वात्मने ।
सर्वकर्त्रे । सर्वपात्रे । सनातनाय । सिद्धाय । साध्याय ।
साधकेन्द्राय । साधकाय । साधकप्रियाय । सिद्धेशाय । सिद्धिदाय ।
साधवे । सत्कर्त्रे नमः ॥ ९४०

ॐ सदीश्वराय नमः । सद्गतये । सच्चिदानन्दाय । सद्ब्रह्मणे ।
सकलात्मकाय । सतीप्रियाय । सतीभार्याय । स्वाध्यायाय ।
सतीपतये । सत्कवये । सकलत्रात्रे । सर्वपापप्रमोचकाय ।
सर्वशास्त्रमयाय । सर्वाम्नायनमस्कृताय । सर्वदेवमयाय ।
सर्वयज्ञस्वरूपकाय । सर्वाय । सङ्कटहर्त्रे । साहसिने ।
सगुणात्मकाय नमः ॥ ९६०

ॐ सुस्निग्धाय । सुखदात्रे । सत्त्वाय । सत्त्वगुणाश्रयाय ।
सत्याय । सत्यव्रताय । सत्यवते । सत्यपालकाय । सत्यात्मने ।
सुभगाय । सौभाग्याय । सगरान्वयाय । सीतापतये । ससीताय ।
सात्त्वताय । सात्त्वताम्पतये । हरये । हलिने । हलाय ।
हरकोदण्डखण्डनाय नमः ॥ ९८०

ॐ हुङ्कारध्वनिकर्त्रे नमः । हुङ्कारध्वनिपूरणाय ।
हुङ्कारध्वनिसम्भवाय । हर्त्रे । हरये । हरात्मने ।
हारभूषणभूषिताय । हरकार्मुकभङ्क्त्रे । हरपूजापरायणाय ।
क्षोणीशाय । क्षितिभुजे । क्षमापराय । क्षमाशीलाय । क्षमायुक्ताय ।
क्षोदिने । क्षोदविमोचनाय । क्षेमङ्कराय । क्षेमाय ।
क्षेमप्रदायकाय । ज्ञानप्रदाय नमः ॥ १०००

इति श्रीरामसहस्रनामावलिः ३ समाप्ता ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIrAmasahasranAmAvaliH 3*

pdf was typeset on April 2, 2020

Please send corrections to *sanskrit@cheerful.com*